শ্ৰীঃ
শ্ৰীমতে ৰামানুজায নমঃ
শ্ৰীমতে নিগমান্তমহাদেশিকায নমঃ
শ্ৰীসীতালক্ষ্মণভৰতশত্ৰুঘ্নহনুমৎসমেত শ্ৰীৰামচন্দ্ৰ পৰব্ৰহ্মণে নমঃ

## শ্ৰীমদ্ৰামাযণে ৱাল্মীকীযে আদিকাৱ্যে কিষ্কিন্ধাকাণ্ডে

# ॥ ষোডশঃ সৰ্গঃ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্ৰী ৰঙ্গৰামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীসীতালক্ষ্মণভরতশত্রুঘ্নহনুমৎসমেত শ্রীরামচন্দ্র পরব্রহ্মণে নমঃ

# ॥ ষোডশঃ সর্গঃ ॥

## ৱালিনা তারাং নির্ভর্ত্স্য নিৱর্তনং সুগ্রীৱেণ সহ যোধনং চ শ্রীরামেণ বাণেন ৱিদ্ধস্য তস্য পৃথ্ৱ্যাং পতনং চ

তামেৱং ব্রুৱতীং তারাং তারাধিপনিভাননাম্।
ৱালী নির্ভর্ত্সযামাস ৱচনং চেদমব্রৱীৎ॥ **4.16.1** ॥

গর্জতোঽস্য সুসংরব্ধং ভ্রাতুঃ শত্রোর্ৱিশেষতঃ।
মর্ষযিষ্যামি কেনাপি কারণেন ৱরাননে॥ **4.16.2** ॥

অধর্ষিতানাং শূরাণাং সমরেষ্ৱনিৱর্তিনাম্।
ধর্ষণামর্ষণং ভীরু মরণাদতিরিচ্যতে॥ **4.16.3** ॥

সোঢুং ন চ সমর্থোঽহং যুদ্ধকামস্য সংযুগে।
সুগ্রীৱস্য চ সংরম্ভং হীনগ্রীৱস্য গর্জিতম্॥ **4.16.4** ॥

ন চ কার্যো ৱিষাদস্তে রাঘৱং প্রতি মৎকৃতে।
ধর্মজ্ঞশ্চ কৃতজ্ঞশ্চ কথং পাপং করিষ্যতি॥ **4.16.5** ॥

নিৱর্তস্ৱ সহ স্ত্রীভিঃ কথং ভূযোঽনুগচ্ছসি।
সৌহৃদং দর্শিতং তাৱন্মযি ভক্তিস্ত্ৱযা কৃতা॥ **4.16.6** ॥

প্রতিযোৎস্যাম্যহং গৎৱা সুগ্রীৱং জহি সম্ভ্রমম্।
দর্পং চাস্য ৱিনেষ্যামি ন চ প্রাণৈর্ৱিযোক্ষ্যতে॥ **4.16.7** ॥

অহং হ্যাজিস্থিতস্যাস্য করিষ্যামি যদীপ্সিতম্।
ৱৃক্ষৈর্মুষ্টিপ্রহারৈশ্চ পীডিতঃ প্রতিযাস্যতি॥ **4.16.8**॥

ন মে গর্ৱিতমাযস্তং সহিষ্যতি দুরাত্মৱান্।
কৃতং তারে সহাযৎৱং দর্শিতং সৌহৃদং মযি॥ **4.16.9**॥

শাপিতাসি মম প্রাণৈর্নিৱর্তস্ব জনেন চ।
অলং জিৎৱা নিৱর্তিষ্যে তমহং ভ্রাতরং রণে॥ **4.16.10**॥

তং তু তারা পরিষ্ৱজ্য ৱালিনং প্রিযৱাদিনী।
চকার রুদতী মন্দং দক্ষিণা সা প্রদক্ষিণম্॥ **4.16.11**॥

ততঃ স্বস্ত্যযনং কৃৎৱা মন্ত্রৱিদ্ ৱিজযৈষিণী।
অন্তঃপুরং সহ স্ত্রীভিঃ প্রৱিষ্টা শোকমোহিতা॥ **4.16.12**॥

প্রৱিষ্টাযাং তু তারাযাং সহ স্ত্রীভিঃ স্বমালযম্।
নগর্যা নির্যযৌ ক্রুদ্ধো মহাসর্প ইৱ শ্ৱসন্॥ **4.16.13**॥

স নিঃশ্ৱস্য মহারোষো ৱালী পরমৱেগৱান্।
সর্ৱতশ্চারযন্ দৃষ্টিং শত্রুদর্শনকাঙ্ক্ষযা॥ **4.16.14**॥

স দদর্শ ততঃ শ্রীমান্ সুগ্রীৱং হেমপিঙ্গলম্।
সুসংৱীতমৱষ্টব্ধং দীপ্যমানমিৱানলম্॥ **4.16.15**॥

তং স দৃষ্টৱা মহাবাহুঃ সুগ্রীৱং পর্যৱস্থিতম্।
গাঢং পরিদধে ৱাসো ৱালী পরমকোপনঃ॥ **4.16.16**॥

স ৱালী গাঢসংৱীতো মুষ্টিমুদ্যম্য ৱীর্যৱান্।
সুগ্রীৱমেৱাভিমুখো যযৌ যোদ্ধুং কৃতক্ষণঃ॥ **4.16.17**॥

শ্লিষ্টং মুষ্টিং সমুদ্যম্য সংরব্ধতরমাগতঃ।
সুগ্রীৱোঽপি সমুদ্দিশ্য ৱালিনং হেমমালিনম্॥ **4.16.18**॥

তং ৱালী ক্রোধতাম্রাক্ষঃ সুগ্রীৱং রণকোৱিদম্।
আপতন্তং মহাৱেগমিদং ৱচনমব্রৱীৎ॥ **4.16.19** ॥

এষ মুষ্টির্মহান্ বদ্ধো গাঢঃ সুনিযতাঙ্গুলিঃ।
মযা ৱেগৱিমুক্তস্তে প্রাণানাদায যাস্যতি॥ **4.16.20** ॥

এৱমুক্তস্তু সুগ্রীৱঃ ক্রুদ্ধো ৱালিনমব্রৱীৎ।
তৱ চৈষ হরন্ প্রাণান্ মুষ্টিঃ পততু মূর্ধনি॥ **4.16.21** ॥

তাডিতস্তেন তং ক্রুদ্ধঃ সমভিক্রম্য ৱেগতঃ।
অভৱচ্ছোণিতোদ্গারী সাপীড ইৱ পর্ৱতঃ॥ **4.16.22** ॥

সুগ্রীৱেণ তু নিঃশঙ্কং সালমুৎপাট্য তেজসা।
গাত্রেষ্ৱভিহতো ৱালী ৱজ্রেণেৱ মহাগিরিঃ॥ **4.16.23** ॥

স তু ৱৃক্ষেণ নির্ভগ্নঃ সালতাডনৱিহ্ৱলঃ।
গুরুভারভরাক্রান্তা নৌঃ সসার্থেৱ সাগরে॥ **4.16.24** ॥

তৌ ভীমবলৱিক্রান্তৌ সুপর্ণসমৱেগিতৌ।
প্রৱৃদ্ধৌ ঘোরৱপুষৌ চন্দ্রসূর্যাৱিৱাম্বরে॥ **4.16.25** ॥

পরস্পরমমিত্রঘ্নৌ ছিদ্রান্ৱেষণতৎপরৌ।
ততোঽৱর্ধত ৱালী তু বলৱীর্যসমন্ৱিতঃ॥ **4.16.26** ॥

সূর্যপুত্রো মহাৱীর্যঃ সুগ্রীৱঃ পরিহীযত।
ৱালিনা ভগ্নদর্পস্তু সুগ্রীৱো মন্দৱিক্রমঃ॥ **4.16.27** ॥

ৱালিনং প্রতি সামর্ষো দর্শযামাস রাঘৱম্।
ৱৃক্ষৈঃ সশাখৈঃ শিখরৈর্ৱজ্রকোটিনিভৈর্নখৈঃ॥ **4.16.28** ॥

মুষ্টিভির্জানুভিঃ পদ্ভির্বাহুভিশ্চ পুনঃ পুনঃ।
তযোর্যুদ্ধমভূদ্ঘোরং ৱৃত্রৱাসৱযোরিৱ॥ **4.16.29** ॥

তৌ শোণিতাক্তৌ যুধ্যেতাং ৱানরৌ ৱনচারিণৌ।
মেঘাৱিৱ মহাশব্দৈস্তর্জমানৌ পরস্পরম্॥ **4.16.30** ॥

হীযমানমথাপশ্যৎ সুগ্রীৱং ৱানরেশ্ৱরম্।
প্রেক্ষমাণং দিশশ্চৈৱ রাঘৱঃ স মুহুর্মুহুঃ॥ **4.16.31** ॥

ততো রামো মহাতেজা আর্তং দৃষ্টৱা হরীশ্ৱরম্।
স শরং ৱীক্ষতে ৱীরো ৱালিনো ৱধকাঙ্ক্ষযা॥ **4.16.32** ॥

ততো ধনুষি সন্ধায শরমাশীৱিষোপমম্।
পূরযামাস তচ্চাপং কালচক্রমিৱান্তকঃ॥ **4.16.33** ॥

তস্য জ্যাতলঘোষেণ ত্রস্তাঃ পত্ররথেশ্ৱরাঃ।
প্রদুদ্রুৱুর্মৃগাশ্চৈৱ যুগান্ত ইৱ মোহিতাঃ॥ **4.16.34** ॥

মুক্তস্তু ৱজ্রনির্ঘোষঃ প্রদীপ্তাশনিসন্নিভঃ।
রাঘৱেণ মহাবাণো ৱালিৱক্ষসি পাতিতঃ॥ **4.16.35** ॥

ততস্তেন মহাতেজা ৱীর্যযুক্তঃ কপীশ্ৱরঃ।
ৱেগেনাভিহতো ৱালী নিপপাত মহীতলে॥ **4.16.36** ॥

ইন্দ্রধ্ৱজ ইৱোদ্ধূতঃ পৌর্ণমাস্যাং মহীতলে।
আশ্ৱযুক্সমযে মাসি গতশ্রীকো ৱিচেতনঃ।
বাষ্পসংরুদ্ধকণ্ঠস্তু ৱালী চার্তস্ৱরঃ শনৈঃ॥ **4.16.37** ॥

নরোত্তমঃ কালযুগান্তকোপমং
    শরোত্তমং কাঞ্চনরূপ্যভূষিতম্।
সসর্জ দীপ্তং তমমিত্রমর্দনং
    সধূমমগ্নিং মুখতো যথা হরঃ॥ **4.16.38** ॥

অথোক্ষিতঃ শোণিততোযৱিস্রৱৈঃ
    সুপুষ্পিতাশোক ইৱানিলোদ্ধতঃ।
ৱিচেতনো ৱাসৱসূনুরাহৱে
    প্রভ্রংশিতেন্দ্রধ্ৱজৱৎ ক্ষিতিং গতঃ॥ **4.16.39**॥

॥ ইত্যার্ষে শ্রীমদ্রামাযণে ৱাল্মীকীযে আদিকাৱ্যে
কিষ্কিন্ধাকাণ্ডে ষোডশঃ সর্গঃ॥